दिनाङ्क :- 16.05.2025 प्रातः - 06:55

अथ वार्ताः

## जयशङ्कर

विदेशमन्त्री डॉ. एस्. जयशङ्करः भारत-पाकिस्तान-देशयोर्मध्ये तृतीय-पक्षस्य मध्यस्थतां निराकृतवान्। असौ सबलतया प्रख्यापितवान् यत् नवदिल्ल्याः इस्लामाबादेन सह व्यवहारः पूर्णतया द्विपक्षीयो भविष्यति। नवदिल्ल्याम् एकस्मिन् कार्यक्रमावधौ वार्ताहरैः समं सम्भाषमाणः डॉ. जयशङ्करः उक्तवान् यत् भारतेन स्पष्टीकृतम् उक्तवान् यत् भारतेन स्पष्टीकृतं यत् पाकिस्तानदेशेन सह चर्चार्थं केवलम् एकावार्ताविशिष्टा वर्तते सास्ति पाकिस्तानाधिकृत-जम्मूकश्मीरे अवैधरूपेण व्याप्तस्य भारतीयक्षेत्रस्य रिक्तता इति। विदेशमन्त्रिणा अग्रे प्रोदीरितं यत् सिन्धुजलसन्धिः तावत् स्थगितो भविष्यति यावत् पर्यन्तं पाकिस्तान-देशः सीमापारातङ्कवादे विश्वनीयम् अवरोधनं नैव स्थापयिष्यति।

## राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी आतङ्कवादं विरुध्य भारतस्य नीतिं नवीनपद्धत्या परिभाषितवान्। तथा च भारतभूमौ दुरापादितं किमपि आक्रमणम् युद्धस्य कार्याचरणे परिगणितं भविष्यति। असौ सिन्दूराभियानम् इतिवृत्ते आतङ्कवादस्य विरुद्धय भारतद्वारा कृतं बृहत्तमं कारणं कथितवान्। सैन्यबलस्य 15-कॉर्प्स-बादामी-बाग-कॉन्टूनमेन्ट इत्यत्र सैनिकान् सम्बोधयन् असौ भारतीय-सशस्त्र-बलानां शूरतां वीरताम् अवधानपूर्वकानि कृतानि बलयुतानिकार्याण्यपि प्रशंसितवान्।

## तुर्किएदेशः

प्रशासनेन तुर्किए-देशस्य ग्राउण्ड-हैंडलिंग-फर्म-सेलेबी-एयरपोर्ट-सर्विसेज-इण्डिया-प्राइवेट-लिमिटेड-इत्येतस्य सुरक्षास्वीकृतिः तात्कालिकरूपेण निरस्तीकृता। प्रसारिते आदेशे नागरिकोड्डयनसुरक्षाविभागः बी.सी.ए.एस्. इति सूचितवान् यत् अयं निर्णयः राष्ट्रियसुरक्षायाः कल्याणाय गृहीतो विद्यते। बी.सी.ए.एस्. इति दिल्ली-मुम्बई-बेंगलुरू-गोवा-कोचि-कन्नूर-विमानपत्तनस्थानकेषु विमानसञ्चालनं प्रैष्यकार्याणि च समेत्य विभिन्नानां सेवानां प्रबन्धनकार्यं निष्पादयतीति।

## सत्यसूचनान्वेषणम्

प्रशासनेन नैकासां वार्ता-वाहिनीनां सामाजिक-सन्देश-पटलानाञ्च तानि प्रतिवेदनानि निरस्वीकृतानि येषु अभिकथनानि निहितानि आसन् यत् विदेशमन्त्री डॉ.एस्. जयशङ्करः उक्तवान् आसीत् यत् चीनदेशीयैः उपग्रहैः पाकिस्तानदेशस्य सहायता कृता। पत्रसूचनाकार्यालयस्य फैक्टचेक-इति सत्यसूचनान्वेषणविभागः स्पष्टीकृतवान् यत् विदेशमन्त्रिणम् अनुचितविधिना प्रस्तौति तस्य च इदं वक्तव्यं नैवासीत्।

## भारतयूरोपीयायोगः

भारतयूरोपीयसङ्घौ सागरीयापशिष्ट-प्लास्टिक-पदार्थान् दूरीकर्तुं अपशिष्टैः हाइड्रोजन-इतीदं विनिर्मातुं द्वे प्रमुखानुन्धाने नवाचारोपक्रमान् च आरब्धवन्तौ। एते उपक्रमाः एकनवत्यधिक त्रिशत-कोटि-रूप्यकाणां निवेशेन सह समारब्धाः।

## विदेशमन्त्री-अफगानिस्तानवार्ताः

जयशङ्करः ह्यः अफगानिस्तान-देशस्य विदेश-कार्यविषयक-मन्त्रिणा मावलावी अमीर् खान् मुत्तकी इत्यनेन सह वार्तालापं कृत्वा पहलगामातङ्क्याक्रमणस्य निन्दाम् अकरोत्। डॉ. जयशङ्करः, भारत-अफगानिस्तान-देशयोः मध्ये मिथ्या-निराधार-प्रतिवेदनानां माध्यमेन अविश्वासं जनयितुं सद्यः एव कृतप्रयासानां श्री मुत्तकी-इत्यस्य दृढतया निराकरणस्य स्वागतम् अकरोत्। सामाजिक-जालपुटे एकस्मिन् प्रकाशने डा. जयशङ्करः अवदत् यत् सः अफगानिस्तानस्य जनैः सह भारतस्य पारम्परिक-मैत्रीम् अपि च तेषां विकासस्य आवश्यकतानां कृते निरन्तरं समर्थनं च प्राथयत्।

## चतुरङ्गक्रीडा

चतुरङ्गक्रीडायां भारतीय शीर्ष क्रीडक: निहाल-सरीन: यूएई-इत्यत्र आयोजितायाम् एशियाई-चैम्पियनशिप-प्रतिस्पर्धायाम् उपविजेता जात:। रजतपदकस्य प्राप्तानन्तरमपि निहाल-सरीन: आगामिनि एफ्.आई.डी.ई. इत्येतस्मिन् चतुरङ्ग-विश्व-चषके स्थानं प्राप्तवान्, इयं प्रतिस्पर्धा वर्षान्ते भारते आयोजयिष्यते।

।। इति वार्ता:।।